Bal Bharati
PUBLIC SCHOOL
Sector-21, Noida, G.B. Nagar

# संस्कृत-दिवस-समारोहः

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तत्रापि काव्यं मधुरं तस्मादपि सुभाषितम्॥**



दीप प्रज्ज्वलन




मंत्रोच्चारण



मनमोहक नृत्य

दिनाङ्क 16 अगस्त 2024 तिथौ, बालभारती पब्लिक विद्यालये नोएडायाः सभागारे संस्कृतदिवसस्य उपलक्ष्ये कार्यक्रमः आयोजितः। अस्य कार्यक्रमस्य मुख्योद्देशः छात्रेषु संस्कृतभाषायां प्रति रुचिं जागरूकतां च वर्धनम् आसीत्। कार्यक्रमस्य आरम्भः विद्यालयस्य उपप्रधानाचार्यया मुख्याध्यापिकया च दीपप्रज्वलन माध्यमेन संस्कृतमन्त्रोच्चारणेन च अभवत्। ततः परं, संस्कृतभाषायाः महत्त्वं प्रति छात्रैः संक्षिप्त-भाषणं प्रदत्तं यत्र उक्तं यत् संस्कृतं न केवलं प्राचीनभाषा अस्ति, अपितु सा अस्माकं संस्कृति-संस्काराणां आध्यात्मिकतायाः च अस्तित्वम् अस्ति।

छात्राः अस्मिन् अवसरे विविधविधान् सांस्कृतिक-कार्यक्रमान् प्रस्तुतवन्तः। पूर्वप्राथमिककक्षायाः छात्रैः संस्कृतमन्त्राणामुच्चारणं कृतं, प्राथमिककक्षायाः छात्रैः श्लोकपाठः कृतः, वरिष्ठवर्गस्य छात्रैः संस्कृतभाषायां संवादस्य नाटकस्य च मञ्चनं कृतं। अस्मिन् समये, छात्राः गीतायाः श्लोकान् अगायन्।

अतिरिक्तं, यत्र छात्राणां गीतं सर्वान् मंत्रमुग्धं कृतवन्तः, तत्र नृत्यकलायाः उत्कृष्टता सर्वेषां मनः अकर्षत्। कार्यक्रमस्य अन्ते मंचसंचालकैः आद्या सोमया च सर्वेषां धन्यवादं कृतम्। प्रधानाचार्या श्रीमती आशा प्रभाकरमहोदया अपि छात्रेभ्यः आशीर्वादं दत्त्वा संस्कृतभाषायाः अध्ययनं प्रति प्रोत्साहनं दत्त्वा उक्तवन्त्यः यत् संस्कृतं न केवलं अस्माकं अतीतं ज्ञातुं साधनं अस्ति, अपितु सा अस्माकं जीवनस्य नैतिक-बौद्धिक-सांस्कृतिक-मूल्यानि अपि सुदृढं कर्तुं आवश्यकी अस्ति। संस्कृतदिवसस्य एषः समारोहः सर्वेषां कृते प्रेरणादायकः ज्ञानवर्धकः च आसीत्, यत्र छात्राः संस्कृतभाषां प्रति श्रद्धां सम्मानं च प्रकटितवन्तः।

**"जयतु संस्कृतं जयतु भारतं"** इति उद्घोषेण राष्ट्रगीतेन च सह कार्यक्रमस्य समाप्तिः अभवत्।

